**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 1, Issue - 3, Nov-Dec – 2018
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 1.847 Publication Date: 31/12/2018

# दीक्षितप्रतिपादितानन्वयालङ्कारस्य जगन्नाथकृतखण्डनस्य विचारात्मकं समीक्षणम्

**Dr. Pinki Das**
Assistant Professor, Department of Sanskrit
Purnidevi Chowdhury Girls' College, Bolpur, Birbhum (West Bengal)
E-mail : pinkidas2712@gmail.com

**प्राचीनाभिमतानन्वयस्वरूपप्रस्तावः**

अनन्वयस्य प्राचीनोक्तं लक्षणं यथा- "एकस्यैवोपमानोपमेयत्वेऽनन्वयो मतः[1]।" अनन्वयशब्दस्य शाब्दिकोऽर्थः भवति **"न विद्यतेऽन्वयः सम्बन्धः उपमानान्तरेण यत्र सोऽनन्वयः[2]।"** अत्रायमभिप्रायः – कस्यापि प्रकारस्य भेदस्याभावेऽपि भेदमूलकस्य सादृश्योपचारं विधायैकस्मिन्नेव वस्तुनि उपमानोपमेयभावः प्रतिपादितः स्यात् येन एतत् प्रतीयमानो भवेत् यत् तत्सदृशं किमप्यन्यद्वस्तु न स्यात् न वा तस्य कोऽप्यन्यत्र साधर्म्यं स्यात्तदा तत्र योऽलङ्कारो भवति स अनन्वयः भवति।

अस्मिन् प्राचीनलक्षणे एवकारबलादेकस्यामेवोपमितिक्रियायामिति गम्यते। तेनोपमेयोपमायां रसनोपमायां च नातिव्याप्तिः। अतएव उपमेयोपमायां तथा रसनोपमायां अनन्वयोऽलङ्कारस्य अतिव्याप्तिनिवारणार्थम् एकस्यैव विशेषणं युक्तमिति। यतः तत्र द्वौ पदार्थौ अथवा बहवः पदार्थाः उपमानत्वम् उपमेयत्वं च धार्यते। अत्र अनन्वये धर्मः सदैव अनुगामी भवतीति।

उदाहरणकथनेन अनन्वयस्य द्वौ भेदौ उच्यते। एतदुदाहरणं यथा-

**"गगनं गगनाकारं सागरः सागरोपमः[3]।"**

उदाहरणमिदम् अनन्वयस्य प्रथमभेदस्य प्रतीयमानधर्मस्य। द्वितीयभेदस्य निर्दिष्टधर्मस्य च यथा-

**"न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव।**

**यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः[4]।।"**

अत्र प्रथमभेदोदाहरणे- गगनम्- आकाशः, गगनाकारम्-आकाश इव मनोरमः, तथैव सागरस्योपमा सागर एव इत्यादौ एव एकमेव गगनं सादरो वा इत्यत्र उपमानत्वमुपमेयत्वञ्च उभौ अपि स्तः। गाम्भीर्य-दारुणतादिधर्मेषु वाच्यताया अभावात् प्रतीयमानधर्मस्यैव विवक्षा विद्यते। सुधाकारा अप्येवं वदन्ति- **"वेपुल्यगाम्भीर्यदारुणत्वानां धर्माणां वाच्यत्वाभावादस्य प्रतीयमानधर्मत्वम्[5]।"**

निर्दिष्टधर्मोदाहरणे च- अतिशयरमणीयता सा नितम्बिनी नितम्बिनीव अर्थात् स्वीयाकृतिरिव केवलं सुन्दरी न प्रतिभाति अपि त्वस्यामनङ्गोऽपि नरीनृत्यति एवमेवास्याः भावविलासा अपि तथैव। इयं प्रतीतिः अनन्वये उपमानान्तरसम्बन्धाभावस्य प्रतीतिरिति। यस्मात् कारणात् अत्र अनन्वयोऽलङ्कारः भवति। अत्र प्रकाशनरूपधर्मस्य शक्त्या प्रतिपाद्यत्वात् निर्दिष्टधर्मत्वम्।

**(क) दीक्षितमतेन उक्तप्राचीनाभिमतविमर्शः-**

प्राचीनोक्तेऽनन्वयलक्षणे दोषं प्रकटयन् दीक्षितमहाशयाः स्वीयं लक्षणमुपस्थापयितुमुपक्रमन्ते। यथा ननु-

**"पितुर्नियोगाद्वनवासमेवं निस्तीर्य रामः प्रतिपन्नराज्यः।**

**धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिम्[6]।।"**

राम एवं पितुर्नियोगात् शासनात् वनवासस्य दुःखं निस्तीर्य अनन्तरं प्रतिपन्नराज्यः सन् धर्मार्थकामेषु वृत्तिर्यथा तथैवावरजेषु अनुजेषु समां वृत्तिं प्रपेदे। इत्यत्र एकस्यैव रामस्य उपमानत्वमुपमेयत्वञ्चास्ति। किन्तु अत्र अनन्वयः नास्ति। समुच्चयोपमया धर्मादिषु भ्रातृषु

---
[1] चित्रमीमांसा, पृष्ठम् 177।
[2] तत्रैव, पृष्ठम् 177।
[3] तत्रैव, पृष्ठम् 177।
[4] तत्रैव, पृष्ठम् 177।
[5] चित्रमीमांसा, सुधाव्याख्या, पृष्ठम् 178।
[6] रघुवंशम् 14/21, पृष्ठम् 247। चित्रमीमांसा, पृष्ठम् 179।

च रामस्य समवृत्तित्वमात्रस्यैव प्रतिपाद्यतया द्वितीयसदृशनिषेधे तात्पर्यस्य अभावोऽस्ति। तस्मात् समुच्चयोपमायाम् अतिव्याप्तिरिति भावः। तथा च दूषणानन्तरमाह- **"त्यक्ष्यामि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयेव"**[7] इत्यत्रापि रामस्यैव उपमानत्वम् उपमेयत्वं च प्रतिपाद्यते। किन्तु तत्रापि न अनन्वयोऽलङ्कारः। समुच्चयोपमया पितृनियोगात् राज्यत्यागे तथा निन्दाभयात् सीतात्यागे रामस्य समवृत्तिमात्रस्यैव प्रतिपाद्यतया द्वितीयसदृशनिषेधे तात्पर्यस्य अभावोऽस्ति। अतएव समुच्चयोपमायाम् अतिव्याप्तिरिति। एवमेव-

**"उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम्।**
**स तद् दुकूलादविदूरमौलिर्बभौ पतद् गङ्ग इवोत्तमाङ्गे[8]।।"**

इत्यत्रापि शिवस्य उपमानत्वे उपमेयत्वे च स्थित्वे अतिव्याप्तिदोषरिति। पूर्वोदाहरणानामुपरि अयं विचार्यते- न च एतेषु क्वचिद्धर्मादिषु वृत्तेः अवरजेषु अनुजेषु वृत्तेश्चोपमानोपमेयभावः। अन्यत्र क्षितित्यागस्य सीतात्यागस्य च अपरत्र गङ्गापतनस्य दुकूलसंनिधानस्य च न तु क्वचिद् अपि एकस्यैव धर्मिण उपमानोपमेयभावरिति। विशिष्टान्वयिनोऽपि विशेष्यबोधे विशेषणसंक्रमौचित्यादिति वाच्यम्। तथा च नातिप्रसङ्गस्य आशङ्का इति पूर्वपक्षाणामभिप्रायः। अत्र समाधानमुच्यते- यथा धर्मार्थकामेषु समवृत्तिं प्रपेदे तथा अवरजेषु इत्यादि प्रकारेण एकस्यैव उपमानोपमेयभावे निबन्धनं वर्त्तते।

विशेषणं संक्रमौचित्यम् इत्यादि न्यायाङ्गीकारे दोषमाह यत्- पाण्ड्योऽयम् अंशार्पितलम्बहार इत्यादौ पूर्वोक्तन्यायेन हारनिर्झरदीनामुपमानोपमेयत्वापत्त्या बिम्बप्रतिबिम्बभावस्य विलयापत्तिरिति। रामरावणयोर्युद्धम् इत्यादौ अभेदेऽपि उपमानोपमेयभावं वदतामालङ्कारिकाणां विशेष्यपदबोधस्यापरिहारासम्भावात्। तस्मात् सविशेषणे हि इति न्यायो वाक्यमीमांसकानामेव मते न तु आलङ्कारिकाणाम्। वाक्यमीमांसका अभेदे उपमानोपमेयभावो नास्ति इति मन्यन्ते। रामरावणयोर्युद्धम् इत्यादौ अपि अद्यतनस्य पूर्वेद्युस्तनं युद्धमुपमानम्। एतत्कल्पीयगगनस्य कल्पान्तरगगनमुपमानमिति कल्पयन्ति। अस्यामेव स्थित्याम् आलङ्कारिकमते एतेषु एकस्यैव उपमानोपमेयसम्भवाद् अतिव्याप्तिग्रस्तमेतल्लक्षणमित्याशयः।

**दीक्षितप्रतिपादितानन्वयालङ्कारलक्षणविमर्शः-**

अनेन प्रकारेण प्राचीनानां पूर्वोक्तलक्षणं दूषयित्वा दीक्षितेन स्वलक्षणं प्रतिपादितम्। यद्यपि दीक्षितेन कुवलयानन्दे चित्रमीमांसायाञ्च अनन्वयालङ्कारस्य विवेचनं कृतम्। परञ्च कुवलयानन्दस्य[9] लक्षणं स्वल्पं प्राचीनानुसार्येवास्ति। चित्रमीमांसायाः लक्षणं विस्तृतम् अव्याप्ति अतिव्याप्ति असम्भवदोषत्रयरहितञ्चास्ति। यथा-

**"स्वस्य स्वेनोपमा या स्यादनुगाम्येकधर्मिका।**

**अन्वर्थनामधेयोऽयमनन्वय इतीरितः[10]।।"**

अत्रायमाशयः – यदि अनुगामिनो धर्मस्याधारे एकस्य वस्तुनः उपमा तद्वस्तुनैव दद्यात्तदा तत्र अन्वर्थकोऽनन्वयालङ्कारो भवति। वैशिष्ट्यञ्चात्र – **"धर्मोऽर्थ इव पूर्णश्रीः"** इत्याद्युपमेयोपमायाम् **"भणितिरिव मतिः"** इति रसनोपमायामतिव्याप्तिवारणाय **"स्वस्य स्वेनेति"** निदर्शनम्।

पूर्वोदाहृतोपमाविशेषेषु पितुर्नियोगाद् इत्यादिषु अतिव्याप्तिवारणाय अनुगाम्येकधर्मत इति। यद्यपि "तेषु अपि समां वृत्तिं प्रपेदे" इत्यादि अंशेऽनुगामिधर्मस्तथा न स एवैकः, धर्मार्थकामावरजाद्यंशे बिम्बप्रतिबिम्बभावः। अनुगामिपदम् उपलक्षणपरकम्। तेन अन्यस्यापि धर्मस्य शुद्धतैव ग्राह्या न तु अन्यमिश्रा। एतदर्थज्ञापनायैव लक्षणे एक इत्यस्य पदस्य समावेशः।

लक्षणे अन्वर्थेत्यादिविशेषणस्य प्रयोजनमाह- यद्यपि अन्वर्थनामधेय इति तु न लक्षणान्तर्गतम् किन्तु लक्षणस्य नियमार्थकत्वम् इति। तन्नियमाकारमाह - स्वेन स्वस्योपमाप्यनुगाम्येकधर्मा चेदेवानन्वयो नान्यथा इति अत्र उपपत्तिमात्रपरम्। धर्मैक्ये हि स्वस्य स्वेनोपमा न अन्वेति इत्यनन्वय इत्यन्वर्थ नाम भवति। अनन्वयार्थनिबन्धनवशाच्चानुपमत्वद्योतनपर्यन्तं धावेत्। धर्मभेदे बिम्बप्रतिबिम्बादौ एकधर्मावच्छिन्नेन स्वेनैव धर्मान्तरावच्छिन्नस्य स्वस्योपमान्वयाद् उपमा एव। न तत्रान्वर्थोऽनन्वयः। अनन्वय्यर्थस्य यन्निबन्धनं तदधीनानुपमत्वफललाभस्याभाव इति दिक्।

अनन्वयत्वप्रयोजकं सामान्यं लक्षणमिदम्। लक्षणमात्रन्तु भामहेन उक्तम्। यत्तु अत्र विचारणीयम्। तदुक्तं लक्षणमाह- **"यत्र तेनैव तस्य स्यात्"**[11]। यत्र वाक्ये तस्य वर्णनीयस्य तेनैव वर्णनीयेन एव उपमेयोपमानता स्यात्। भामहस्य अस्मिन् लक्षणे असादृश्यविवक्षया

[7] तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः।
त्यक्ष्यामि वैदेहसुतां पुरस्तात्समुद्रनेमिं पितुराज्ञयेव।। रघुवंशम् 14/39, पृष्ठम् 255। चित्रमीमांसा, पृष्ठम् 179।
[8] चित्रमीमांसा, पृष्ठम् 180।
[9] उपमानोपमेपत्वं यदेकस्यैव वस्तुनः। इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः।। कुबलयानन्दः, 10 कारिका, पृष्ठम् 8।
[10] चित्रमीमांसा, पृष्ठम् 182
[11] यत्र तेनैव तस्य स्यादुपमानोपमेयता।
असादृश्यविवक्षातस्तमित्याहुरनन्वयम्।। काव्यालङ्कारः (भामहस्य) 3/45, पृष्ठम् 174। चित्रमीमांसा, पृष्ठम् 184।

अन्योपमानस्य निराकरणं प्रतीयते। **"उभौ यदि व्योम्नि पृथक् प्रवाहौ"**[12] इत्यादौ अनुपमत्वद्योतनफलसाम्यकल्पनावति अतिशयोक्तिविशेषे अतिव्याप्तिवारणाय एव भामहस्य उक्तलक्षणे **"तेनैव तस्य"** इति विशेषणस्य समावेश इति दीक्षितस्य अभिप्रायः। तथा च अनेन प्रतिपादितम्- यदनन्वयोऽलङ्कारो व्यङ्ग्योऽपि भवतीति। तदुदाहरणतया **अद्य या मम गोविन्द जाता त्वयि गृहागते**[13] इत्यादिश्लोके विदुरस्य गृहागतं कृष्णं प्रत्युक्तिः त्वदागमनप्रभवा प्रीतिर्बहुकालव्यवहितेन पुनरपि त्वदागमनेनैव भवेत् न अन्येन इत्युक्तिभङ्गया त्वदागमनप्रभवप्रीतिः सैव सदृशी न तु इतरप्रभव इति व्यज्यते। अस्य प्रकारस्य व्यङ्ग्योऽनन्वयस्य निराकरणार्थं लक्षणे अव्यङ्ग्यत्वविशेषणम् आवश्यकम् इति।

**जगन्नाथेन दीक्षितस्यानन्वयदोषाविष्करणम्-**

पण्डितराजेन रसगङ्गाधरे चित्रमीमांसखण्डने चोभयग्रन्थे दीक्षितस्य अनन्वयव्यङ्ग्यस्योदाहरणस्यास्य खण्डनं प्रस्तुतम्। तथा च अनेन प्रतिपादितम्- अत्र श्रीकृष्णागमनजन्यप्रीतिरिव कालान्तरेण पुनः श्रीकृष्णागमनजनितप्रीतेः प्रतीतिः सर्वजनसिद्धरिति। अस्मिन् कथने न कस्यापि प्रकारस्य बाधकमस्ति। श्रीकृष्णागमनजन्यप्रसन्नताद्वयं भिन्नसमये उत्पन्नत्वात् तद् भिन्नस्वीकरणे न कस्यापि प्रकारस्य बाधक वर्त्तत इति। अतः अस्यामेव स्थित्याम् उक्तोदाहरणस्य प्रसन्नताद्वयस्य सादृश्यं बाधितमिति वक्तुं न शक्यते। सादृश्यबाधितं विना अनन्वयशब्दस्य व्युत्पत्तिजन्योऽर्थः अत्र संघटितं न भवत्येव। अतः अत्र अनन्वयोऽलङ्कारकथनं न समुचितम्। उपमाप्रकरणे दीक्षितेन स्वयमेव उल्लिखितं यत् स्वसादृश्यान्वयः स्वस्मिन्नेव न भवितुं शक्यते। यत्र स्वस्य स्वेनैव सादृश्यं न भवति अत्र अनन्वयोऽलङ्कारः भवति। अतः पूर्वोक्तभङ्ग्या अस्मिन् उदाहरणे यदि सादृश्यस्य अन्वयो भवितुं शक्यते तर्हि अत्र अनन्वयोऽलङ्कारः कथम्? अत्र उपमेय एकविशेषप्रकारस्य प्रसन्नता- तस्य तुलना यदा तस्यैव द्वितीयप्रसन्नतया प्रदीयते तदा अन्यसदृशस्य निवारणं स्वतः बाध्यते। अतः सन्दर्भेऽस्मिन् अनन्वयस्य लेशमात्रमपि न वर्त्तते इति।

प्रसन्नताद्वयस्य अङ्गिगरूपस्य सामान्यप्रसन्नतायाः अनुपमेयत्वम् अधिकृत्य यदि अत्र अनन्वयस्य अभिव्यक्तिः स्वीक्रियते तर्हि तदपि न उचितं प्रतिभाति। यतः सामान्यप्रसन्नता अत्र न उपमेयः। किन्तु विशेषप्रसन्नता उपमेय इति। विशेषप्रकारस्य प्रसन्नातारूपी उपमेयस्य उपमानमपि विशेषप्रकारस्य प्रसन्नता एव भवितुं शक्यते। न तु सामान्यप्रसन्नता इति। अतः वक्तुं शक्यते उदाहरणमिदं दूषितमिति।

प्रीतिव्यक्तिविशेषरूपस्य उपमेयस्य सदृश अन्यप्रीतिव्यक्तिविशेषस्य व्यवच्छेदे वाधात् तादृशप्रीतिसमान्यावयविनो निरुपमतया प्रतीयमानस्य अनुपमेयत्वेन फलवैयधिकरण्यप्रसङ्गोऽवतिष्ठत इति। यतः प्रीतिविशेषाः अनन्ताः। तत्र सादृश्यस्य प्रतियोगी अनुयोगीश्चापि बहवः सन्ति। किन्तु प्रीतिसामान्यं तु एकमेव। अत- सादृश्यं विशेषे तथा निरुपमत्वं सामान्ये प्रतीयते। तस्मात् एव फलस्य आश्रयभेदत्वं भवतीति।

यदि एतत् उच्यते कस्मिंश्चित् स्थले अवयवस्य उपमा अवयविनः निरुपमत्वस्य व्यञ्जिका भवति। अयं सिद्धान्तः स्वीक्रियत्वेऽपि श्रीकृष्णागमनप्रीतिसामान्यावयविनः स्वेन सादृश्यं मध्ये प्रतीयते इति शपथः कर्तुं न उचितः। यदि एतत् कल्पयते तर्हि सहृदयहृदयसंवेद्यत्वस्य भङ्गत्वापत्ति र्भवति इति। यतः एतत् क्लिष्टकल्पनामात्रमेव अस्ति।[14]

यदि एतत् उच्यते श्रीकृष्णागमनजन्यप्रीतिसामान्यस्य निरुपमत्वस्य सिद्धेः प्रयोजनमस्ति। किन्तु तदपि न समुचितम् इति। यतः एतत्कालावच्छिन्नः कालान्तरावच्छिन्नः तादृशप्रीतिव्यक्त्योरवयवयोः उपमानोपमेयभावेन एव अवयविनि निरुपमेयत्वस्य सिद्धिर्भवत्येव[15]। यथा-

**"एतावति प्रपञ्चे सुन्दरमहिलासहस्रभरितेऽपि।**
**अनुहरति सुभग तस्या वामार्धं दक्षिणार्घस्य[16]।।"**

इत्यादौ अवयवयोः वामार्धदक्षिणार्धयोः सादृश्येन अवयविनः कान्तारूपस्य अनुपमत्वं यथा प्रतीयते तथैव अत्रापि इति। निरुपमत्वप्रतीत्या अवयविनः स्वेन सादृश्यप्रत्ययोऽन्तरा कल्प्यते एतत् तत्रापि कथनं न समुचितमिति। यतः यदि एतत् कल्पयते तर्हि अनन्वये एव निरुपमत्वस्य प्रतीतिः नियतः इति नियमः न वर्त्तते। अन्यथा **"गगनपुष्पमिवास्य वचः सखे"**[17] इत्यादि कल्पितोपमायामपि निरुपमत्वप्रत्ययेन अनन्वयकल्पनापत्तिर्भवति इति।

तथा च पूर्वपक्षिभिः एतदुच्यते भवतः वचनात् अस्माकं लक्षणानुसारेण अनन्वयं व्यङ्ग्यं न भवति। अस्तु इत्येतत्। परन्तु रत्नाकरोक्तस्यैवानन्वयप्रकारविशेषस्यात्र व्यङ्ग्यता वर्त्तत इति। रत्नाकरोक्तमनन्वयालङ्कारस्योदाहरणसदृश इव अत्रापि लक्षणोदाहरणं वर्त्तते। किन्तु एतद् कथनमपि न युक्तिसङ्गतमिति उत्तरपक्षिभिरभिप्रायः। यतः अस्य उदाहरणस्य निरासनं रसगङ्गाधरग्रन्थे पण्डितराजेन

---

[12] शिशुपालवधः, श्लोकः 3/8
[13] अद्य या मम गोविन्द जाता त्वयि गृहागते।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात्पुनः।। चित्रमीमांसा, पृष्ठम् 185।
[14] ना चात्र 'श्रीकृष्णागमनप्रीतिसामान्यावयविनः स्वेन सादृश्यं मध्ये प्रतीयते' इति शपथः कर्तुमुचितः सहृदयत्व भङ्गप्रसङ्गात् प्रयोजनविरहाच्च। चित्रमीमांसाखण्डनम्, पृष्ठम् 37। रसगङ्गाधरः, अनन्वयप्रकरणम्, द्वितीयमाननम्, पृष्ठम् 429।
[15] श्रीकृष्णागमनप्रभवप्रीतिसामान्यस्य निरुपमत्वसिद्धिरेव प्रयोजनम्- इति चेत् न।
एतत्कालावच्छिन्नकालान्तरावच्छिन्नतादृशप्रीतिव्यक्त्योरवयवयोरुपमानोपमेयभावेनैवावयविनि तत्सिद्धेः।
चित्रमीमांसाखण्डनम्, पृष्ठम् 37।
[16] चित्रमीमांसाखण्डनम्, पृष्ठम् 38। रसगङ्गाधरः, द्वितीयमाननम्, पृष्ठम् 423।
[17] चित्रमीमांसाखण्डनम्, पृष्ठम् 38।

कृतमिति। तस्य मतेन उदाहरणमिदं सर्वथा दोषपूर्वत्वात् अनन्वयस्य प्रकारं भवितुं न शक्यते इति। यदि रत्नाकरस्य अनन्वयभेदेभ्यः इदम् उदाहरणमपि अनन्वयस्य भेदरूपेण स्वीकर्तुम् इच्छति किन्तु तदपि न भवितुमर्हति। यतः दीक्षितेन अनन्वयप्रकरणे कुत्रापि तस्य उल्लेखनं न कृतमिति। अतः दीक्षितस्य मतं न रमणीयमिति पण्डितराजस्याभिप्रायः।

**जगन्नाथाभिमतस्य युक्तियुक्तत्वनिरूपणम्-**

अधुना विचारणीयं वस्तुतस्तु साहित्यशास्त्रे सर्वे प्रसिद्धा आलङ्कारिका अनन्वयालङ्कारस्य विवेचनं स्वतन्त्ररूपेण कृतवन्त इति। तथा च सर्वेऽपि ऐकमत्येन उपमेयस्य उपमानम् उपमेयमेव स्वीकृतवन्तः। अस्मिन् सन्दर्भे आलङ्कारिकेषु केवलं तथ्यद्वयस्य मतभिन्नत्वं प्रतीयते। एतत्तु असादृश्य विवक्षा तथा उपमानान्तरव्यवच्छेदः अनन्वयस्य परिभाषायाम् एकमेव पदार्थम् उपमेयं तथा उपमानं स्वीकरणाद् अतिरिक्तं असादृश्यविवक्षाया अपि सन्निवेशः युक्तितरः प्रतिभाति। अन्यसदृशवस्त्वभावस्य प्रदर्शनमेव अनन्वयचमत्कारहेतुः। अधुना विचारणीयः प्रश्नः उक्तदृष्टिभङ्ग्या पण्डितराजस्य पूर्वपक्षिणां मतखण्डनं कियद् पर्यन्तं युक्तिसङ्गतम्। **"अद्य या मम गोविन्द"** इत्यादि उदाहरणे सादृश्यान्वयस्य प्रश्नावतिष्ठते। अनया दृष्ट्या अस्मिन् उदाहरणे सादृश्यान्वयस्यैव विषयमाधारीकृत्य मतभेदो भवति। किञ्चात्र कृष्णागमनजन्यप्रसन्नतारूपस्य उपमेयस्य उपमानमपि प्रसन्नता एव इति। त्वदागमनरूपकर्म त्वेकमेवाऽस्ति। अतः अन्यसदृशवस्तुन अभावप्रदर्शनमत्र स्पष्टतया भवति। अतः पण्डितराजेन केवलं दृष्टिभेदमेवादाय दीक्षितमतस्य खण्डनं कृतमिति। दृष्टिकोणस्य भिन्नत्वम् एव पक्षद्वयस्य भेदकारणम्।

तथा च अवयवयोः उपमया अवयविनः अनुपमत्वस्य व्यञ्जनाभिव्यक्तेः यः प्रश्नः अवतिष्ठते तदपि विचारणीयम्। अनन्वयप्रयोजकं भामहस्य सामान्यलक्षणं अत्र उल्लेखनीयमस्ति। अनन्वयस्य प्रयोजनमेव द्वितीयसदृशनिवृत्तिः अथवा स्वस्य अतिरिक्तम् अन्योपमानस्य निषेध इति। तस्मात् कारणादेव आचार्यभामहेन **"यत्र तेनैव तस्य स्यात्"** इत्यादिलक्षणम् अभिहितम्। अनन्वये शब्दभेदं क्षम्यम्। यतः अत्र अर्थपौनरूक्तिः वर्त्ततेति। अस्मादेव **"अद्य या मम गोविन्द"** इत्यादि उदाहरणे अनन्वयः भवितुमर्हति। अनन्वयं सर्वतोभद्रं करणाय शब्दैक्यस्य अपेक्षा अवश्यमेव वरिवर्ति। तस्मादेव अवयवावयविभावसम्बन्धेन उक्तोदाहरणे प्रतिपादितायां श्रीकृष्णागमनजन्यप्रसन्नतायाम् उपमानस्य तथा उपमेयस्य एकरूपत्वं स्पष्टतः अभिव्यज्यतेति। अनन्वये शब्दैक्यमुद्देश्यमेव अवयवयोः उपमात्वस्य तथा अवयविनः अनुपमात्वस्य अभिव्यक्तेः तात्पर्यमिति।

निष्कर्षरूपेण वक्तुं शक्यते यत् उक्तोदाहरणे दीक्षितस्य अनन्वयमान्यतायां किञ्चिदपि भ्रमं नास्ति किन्तु उचितं प्रतिभाति। अत्रापि केवलं दृष्टिकोणस्य भिन्नतावशादेव जगन्नाथेन दीक्षिताभिमतस्य दोषोद्घाटनं कृतमिति।

**स्वाभिप्रायनिवेदनम्-**

स्वाभिप्रायनिवेदनावसरे एतद् वक्तुं शक्यते, अनन्वयालङ्कारप्रसङ्गे पण्डितराजस्य खण्डनाभिमतं न युक्तियुक्तं प्रतिभाति। "अद्य या मम गोविन्द" इत्यादि उदाहरणे दीक्षितमतं खण्डयित्वा जगन्नाथेन स्वाभिमतं प्रदत्तम्। परञ्च विचारावसरे पण्डितराजस्तु केवलं खण्डनबुद्धया एव खण्डनमकरोदिति मे प्रतिभाति। अतः पण्डितराजापेक्षया दीक्षितस्य मतं रमणीयमस्ति इति ममाभिप्रायः।

**सन्दर्भग्रन्थसूची :**


1. अलंकारकौस्तुभः- संशोधकः शिवदत्तः काशीनाथ पाण्डुरङ्गश्च, प्रकाशकः निर्णयसागराख्यमुद्रणयन्त्रालयः मुम्बइ, संस्करणं सन् 1898।
2. अलंकारशास्त्रेतिहासः- लेखकः डा. जगदीशचन्द्र मिश्र, चौखम्बा सुरभारती प्रकाशन, वाराणसी संस्करणं 2009।
3. अलंकारसर्वस्वम्- टीकाकारः जयरथः, संशोधकः श्रीगिरिराजप्रसादद्विवेदी, प्रकाशकः निर्णयसागराख्यमुद्रणयन्त्रालयः मुम्बइ, संस्करणं द्वितीयम् सन् 1939।
4. काव्यप्रदीपः- टीकाकारः विद्यानाथः, संशोधकः पण्डितः दुर्गाप्रसादः एवं वासुदेवलक्ष्मणशास्त्री, प्रकाशकः चौखम्बा संस्कृत संस्थान वाराणसी, संस्करणं सन् 1982।
5. काव्यालंकारः(भामहस्य)-भाष्यकारः डा. रामानन्द शर्मा, प्रकाशकः चौखम्बा संस्कृत सीरीज आफिस वाराणसी, संस्करणं द्वितीयम्, सन् 2013, वि.सं.2070।
6. चित्रमीमांसा-व्याख्याकारः श्रीजगदीशचन्द्र मिश्र, प्रकाशकः चौखम्बा संस्कृत संस्थान, वाराणसी, संस्करणम् द्वितीयम्, वि.सं. 2060।
7. चित्रमीमांसाखण्डनम्- व्याख्याकारः आचार्यमधुसूदनशास्त्री, प्रकाशकः कृष्णदास अकादमी, वाराणसी, संस्करणं प्रथमम्, वि.सं. 2040, सन् 1983।